Topic 48 - अजन्त पुँल्लिंग सखी शब्द 2,

सख्युरसम्बुद्धौ ।

सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत् ।

अचो ञ्णिति ।

अजन्ताङ्गस्य वृद्धिः ञिति णिति परे । सखायौ, सखायः । सखे । सखायम् । सखायौ, सखीन् । सख्या । सख्ये ।

ख्यत्यात् परस्य ।

'खि' 'ति' शब्दाभ्यां 'खी' 'ती' शब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः । सख्युः

औत्

इदुद्भ्यां परस्य ङेरौत् । सख्यौ । शेषं हरिवत् ।

पतिः समास एव ।

घिसंज्ञः । पत्या । पत्ये । पत्युः । पत्यौ । शेषं हरिवत् । समासे तु - भूपतये । कतिशब्दो नित्यं बहुवचनान्तः

घिसंज्ञा के तीन कार्य हैं -

टा को 'ना' आदेश (आङो नाऽस्त्रियाम्)

ङे, ङसि और ङस् में गुण आदेश (घेर्ङिति)

ङि को औकार और इकार को अकार आदेश

('अच्च घेः)